# શ્રીલક્ષ્મીહયવદનમન્ત્રમાલિકાસ્તુતિઃ

Shri Lakshmi Hayavadana Mantramalika Stuti

sanskritdocuments.org

November 17, 2018

# Shri Lakshmi Hayavadana Mantramalika Stuti

# શ્રીલક્ષ્મીહયવદનમન્ત્રમાલિકાસ્તુતિઃ

## Sanskrit Document Information

Text title : lakShmIhayavadanamantramAlikAstutiH

File name : lakShmIhayavadanamantramAlikAstutiH.itx

Category : vishhnu, devii, lakShmI

Location : doc_vishhnu

Author : kastUrI raNgAchAryasvAmi

Transliterated by : NA

Proofread by : Swamini Tattvapriyananda tattvapriya3108 at gmail.com

Description/comments : Stotra Sringeri

Latest update : November 17, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 17, 2018

*sanskritdocuments.org*

# શ્રીલક્ષ્મીહયવદનમન્ત્રમાલિકાસ્તુતિઃ

॥ શ્રીઃ ॥

શ્રિયૈ નમઃ ।
શ્રીલક્ષ્મીહયવદનપરબ્રહ્મણે નમઃ ।
શ્રીગુરુપરમ્પરાભ્યો નમઃ ।
અસ્મદ્ગુરુપરમ્પરાભ્યો નમઃ ॥

તર્કતીર્થપણ્ડિતરત્નાદ્યનેકબિરુદાવલીવિભૂષિતાનાં મહીશૂરમહાનગરીય-
કસ્તૂરિ-રઙ્ગાચાર્યસ્વામિપાદાનાં કૃતિષુ
શ્રીલક્ષ્મીહયવદનમન્ત્રમાલિકાસ્તુતિઃ ॥

ઓમિત્યાત્માનમન્તર્નિયમિતકરણૈર્ધ્યાયતાં ધ્યાયતીહાં
ઓમિત્યેવ સ્વયં યઃ પરિહૃતવિહતિં સિદ્ધિમાધાતુકામઃ ।
વક્ત્રે વાહસ્ય તસ્ય સ્તુતિમતિમિતવાક્પ્રસ્તુવે તન્મનૂદ્ય-
દ્વર્ણાદ્યસ્રગ્ધરાભિર્વિમૃદિતવિવિધાવદ્યધારાભિરદ્ય ॥ ૧॥

ઋગ્ભિઃ શાશસ્યમાનો મહિમજુષિ યજુષ્યેષ જોઘુષ્યમાણઃ
સામ્ના તોષ્ટૂય્યમાનો મુનિજનહૃદયાબ્જેષુ રારાજ્યમાનઃ ।
નીહારોર્વીધરાભા પ્રતિભટરુચિભિઃ કિઞ્ચ બાભાસ્યમાનઃ
શ્રેયઃ સ્થેયો વિધત્તાં મમ હયવદનાભિખ્યયા ખ્યાયમાનઃ ॥ ૨॥

યચ્છત્વચ્છાચ્છબોધપ્રસરમિહ સ નશ્છન્દમાત્રાપ્રક્લૃપ્તા
ચિચ્ચિચ્ચિત્રપ્રપઞ્ચસ્થિરિગતિનિયતિર્મુર્ધ્નિ તુઙ્ગસ્તુરઙ્ગઃ ।
ભઙ્ગવ્યાસઙ્ગદૂરપ્રસૃમરશરદુદ્ભૂતરાકાસુધાંશુ-
જ્યોત્નાસચ્છાયવિદ્યાવિસરવિતરણસ્થૂલલક્ષો વલક્ષઃ ॥ ૩॥

જુષ્ટો દેવ્યા તયાઽવ્યાન્નિગમસમુદયદ્રોહસંરમ્ભગર્જ-
દ્દૈતેયારણ્યવાહદ્વિષદુદિતરવન્યક્કિચકીર્ષાઽઽકુલસ્ય ।
વક્ત્રે વાહસ્ય હેષાહલહલનિનદેઽભૂતપૂર્વે પ્રવૃત્તે

ભ્રાન્ત્વોરસ્તોઽવતીર્ય દ્રુતતરમમુમાશ્લિષ્ય યા વિસ્મિતાઽઽસ્તે ॥ ૪॥

સારઃ સામ્નામુદારઃ સરસતરઋચામૃદ્ધિરન્તર્ધિદૂરા
ભદ્રાવષ્ટમ્ભયષ્ટિર્વિધિનિધિ યજુષાં ભાગ્યમાથર્વણાનામ્ ।
અઙ્ગાનાં તુઙ્ગશૃઙ્ગં લગતુ મમ તુરઙ્ગોત્તમાઙ્ગોઽન્તરઙ્ગે
સદ્યો હૃદ્યાનિ પદ્યાન્યપિ પરિકલયન્ વિશ્વવિદ્યાનિષદ્યા ॥ ૫॥

મધ્યેબિમ્બં સુધાંશોર્દ્યુમણિનિભમણિશ્રેણિભારાજિરાજત્
હારૈસ્તારૈરુદારૈરહસિતસુધાસાગરોત્સારિપૂરૈઃ ।
બામાઙ્કાવાસલીલાકુતુકલલિતયાઽપ્યઙ્કિતઃ પઙ્કજાક્ષ્યા
શઙ્કાતઙ્કં ચ પઙ્કં તિરયતુ કરુણાપઙ્કિલઃ કશ્ચિદર્વા ॥ ૬॥

રૂઢા પ્રૌઢાસુ વાચાસ્વપિ પુરુષમતિવ્યાપૃતિવ્યાસ્યપોઢાસુ
આધૂતાન્તાસુ તાસુ પ્રતિહતગતિતા ત્વન્નુઽતાવાનનેઽર્વન્ ।
ઇત્થં સત્યપ્યહં યત્તવ ગુણગણનારમ્ભસંરમ્ભનિઘ્નઃ
સ્થાને તદ્ યેન બાલોઽપ્યતિવિતતભુજો વિસ્તૃતિં વક્તિ સિન્ધોઃ ॥ ૭॥

પાતાપાતાલભૂમ્યમ્બરતલનિલયાવાસજાયાસસારાત્
યાતાયાતાનુપૂર્વ્યાદવિગતજનનીગર્ભવિભ્રાન્તિયોગાત્ ।
વેદ્યા વેદ્યાવમર્શાસ્સ્ખલિતગતિયતીશાનરાજ્યાસભાજ્યઃ
શાન્તાશાન્તાં સમૃદ્ધિં વિતરતુ સ મમ વ્યાજવાજીવિરાજી ॥ ૮॥

યસ્મિન્ વિજ્ઞાનવાર્ધાવધિજગતિ પુરોજ્જૃમ્ભમાણેઽષ્ટમૂર્તેઃ
મૂર્તિઃ સા દક્ષિણાખ્યા ત્રિદશપરિષદા બિન્દુરાલક્ષ્ય દક્ષા ।
વાણી સા પદ્મસદ્મપ્રિયતમગૃહિણી કાઽપ્યભાણીહ વેણી
પારાશર્યપ્રધાનોઽપ્યગણિ મુનિગણઃ પલ્વલં પાતુ સોઽર્વા ॥ ૯॥

વેદોદ્ધારોદ્યતં તત્પ્રદિશતુ મિથુનં શર્મ શર્વાદિમાનાં
સેવાહેવાકભૂમોદ્યદહમહમિકાકુઞ્ચનદ્વેષિમૂર્ધ્નામ્ ।
શીર્ષેષ્વાભાન્તિ યસ્ય દ્વિગુણમણિલતાભાવભાજઃ કટાક્ષાઃ
કલ્યોત્ફુલ્લામ્બુજાતપ્રમદભરનિરાકારનિસ્તન્દ્રદૃષ્ટેઃ ॥ ૧૦॥

દાક્ષ્યં લક્ષ્યેત ધાતુઃ ક્વનુ ખલુ જગતીજાલનિર્માણલીલા-
રમ્ભે સંજ્ઞાવિધાવપ્યથ ચ તદુચિતાનેકમૂર્તિપ્રક્લૃપ્તૌ ।
તત્તત્કૃત્યપ્રપઞ્ચેષ્વપિ ચ દિવિષદાં દૈત્યપાશાહૃતાના-
મામ્નાયાનાં દયાર્દ્રો યદિ હયવદનો નોદ્ધૃતિં સંવિદધ્યાત્ ॥ ૧૧॥

હસ્તાલમ્બાય ભૂયાત્ સ મમ પથિ સતાં સ્રસ્તવૃત્તસ્ય નિત્યં
ન્યસ્તાશેષાગમાબ્ધેરધિકમપિ સમં વસ્તુની યસ્ય ન સ્તઃ ।
શસ્તામસ્તોકધીસંસ્તુતિમપિ જનયન્ યો નયન્મોહમસ્તં
ન્યસ્તં યસ્સવ્યહસ્તે કલયતિ ચ મુદા પુસ્તકં મસ્તકેઽર્વા ॥ ૧૨॥

રત્નં યત્પ્રત્નવાચા નિરુપમસુષમાકાન્તસીમન્તિનીનાં
સીમન્તે નિત્યલાલ્યં હૃદયસરસિજેઽજસ્રધાર્યં બુધાનામ્ ।
દુગ્ધોદન્વત્તનૂજાકરજલજયુગીલાલનોદ્યન્મૃજાતો
નિત્યં નૂત્નં હયાસ્યં મમ કલયતુ તન્નિસ્સપત્નં પ્રયત્નમ્ ॥ ૧૩॥

ણત્વં યદ્ભિન્નવૃત્તાવઘટિતમુપલભ્યોદ્યમાદ્દ્રાગ્વિરેમુઃ
તે તે નારાયણાખ્યામિતરવિબુધસાધારણીં કર્તુકામાઃ ।
યસ્મિંસ્તદ્યોગરૂઢ્યોર્ગુણમણિજલધૌ પુષ્કલં વર્તનં સ્યાત્
દેવો માયાધવોઽસૌ ધયતુ હૃદિ રુજાં સૈન્ધવો બાન્ધવો નઃ ॥ ૧૪॥

કર્ણાવર્ણોજરાજન્મુકુલદલસમાવર્વતોઽનર્વણો મે
પ્રોર્ણુયાસ્તા લલાટે કુટિલવિધિસમુત્કીર્ણસઙ્કીર્ણવર્ણાન્ ।
વર્ણ્યેતે યાવમુષ્ય ત્રિભુવનવપુષો વ્યોમપાતાલરૂપૌ
પર્ણૈર્વાઽપ્યર્ણસા વા સતતમપિ રુચિં પૂર્ણયદ્ભિર્મહદ્ભિઃ ॥ ૧૫॥

મણ્ડલ્યા મણ્ડનાનાં મણિગણઘૃણિભિર્ઘૂર્ણિતદ્યોમણીનાં
નીરન્ધ્રં મણ્ડિતાઙ્ગઃ સિતકરરુચિરે પુણ્ડરીકે નિષણ્ણઃ ।
આમ્નાયાનાં શિખણ્ડૈરવગતગરિમાખણ્ડિતાખણ્ડલારિઃ
દણ્ડં પાષણ્ડષણ્ડે ક્ષિપતુ સ તરસા વાજિતુણ્ડપ્રકાણ્ડઃ ॥ ૧૬॥

એકોઽગ્રે લોકમાત્રા સહમહિતવિહૃત્યુન્મનાસ્તન્મુદે યો
નાભીપદ્મે વિધાતુર્જનિમપિ કલયન્ યો નયત્યાગમાંસ્તમ્ ।
(નાભીપદ્મે વિધાય દ્રુહિણમમુમથો યો નયત્યાગમૌઘમ્ ।) (પા) ।
લોકામ્નાયૈકમૂલાક્ષરરુચિરકલામાતૃકા સા યદીયા
સોસાવિષ્ટે પ્રકૃષ્ટે ઘટયતુ દિતિજસ્ફોટકો ઘોટકો નઃ ॥ ૧૭॥

પ્રણ્યાયેનાધ્વરાણાં મનુમયતનુમાધાય વિષ્વગ્વિનિર્યત્
જ્વાલામાલાજટાલાનલહુતહવિષાં સારમાસ્વાદ્ય ચારુમ્ ।
ગીર્વાણાન્વારવાણાન્નિયમિતકરણાં સ્તૂર્ણમાપ્યાય્ય કામાઃ
કલ્પ્યન્તે યાજમાનાઃ કલયતુ સ મુદં કોઽપ્યનર્વાઽઽનનેઽર્વા ॥ ૧૮॥

અવ્યાદવ્યાહતાર્થો ધિયમુપજનયન્ અવ્યયોવ્યાજવાજી

ભવ્યાભવ્યાકૃતાદ્યાકૃતિમતનુત યો નામરૂપદ્વયસ્ય ।
યોઽન્તર્યન્તું ચ મન્તું વ્યુદસિતુમદિશજ્જન્તુજાતસ્ય યો વા
કલ્પાન્તેઽલ્પાન્ચલોકગ્રસનસમુદિતાપીનતાનન્દિતુન્દઃ ॥ ૧૯॥

ઓદન્વન્મેખલાન્તાદ્બલિનિલયયુતાત્ ક્ષ્માતલાદાચ લોકાત્।
નાલીકાવાસવાસાદવહિતમનસાઽપીક્ષિતે સ્થાસ્નુજાતે ।
યાદૃઙ્નાલક્ષિ કશ્ચિત્ સકૃદપિ નમતાં સાધ્વસધ્વંસદક્ષઃ
ભક્તાનુક્રોશલક્ષ્મા ક્ષપયતુ મમ હૃત્ક્ષોભમક્ષ્ણા સ વાજી ॥ ૨૦॥

ગીતે દૈતેયમોહં કલયિતુમનસો યસ્ય હેષાનુષક્તે
પ્રખ્યાતોદ્ગીથભક્તિં શ્રિતવતિ જનિતે રોદસીરોધકે દ્રાક્ ।
દેવાઃ સમ્ભ્રાન્તભાવા દિતિજકુલમલં વ્યાકુલં ધૂતગર્વા
ગન્ધર્વા મોહશેષં સમજનિ જગતીશેષમેષોઽવતાન્મામ્ ॥ ૨૧॥

થં કિં શબ્દસ્ય મૂર્ધ્નિ ક્વચિદુદિતમુપશ્રુત્ય યત્તત્પદાદિષુ
અપ્યેતદ્યોજયિત્વા કટુરટનપટુસ્વૈરવાચોઽપિ જન્તોઃ ।
સદ્યઃ સિદ્ધ્યન્તિ વાણ્યો નમદમરશિરસ્સદ્મ યત્પાદપદ્મ-
ધ્યાનાદ્દ્રાક્ષાસદૃક્ષાઃકલિતગુરુશિરઃકમ્પનાઃપાતુ સોઽર્વા ॥ ૨૨॥

વક્તું સૂક્તં સુધાક્તં પ્રતિકથકવચોવીચિવેગં ચ હર્તું
કર્તું કાવ્યં ચ ભવ્યં હિતમપિ પુરુષાર્થં ચ તત્ત્વં ચ વેત્તુમ્ ।
વાચ્છા ચેન્માનસ અચ્ચ સ્ફટિકમણિમયક્ષ્માધરાભાધરીકૃત્
રોચિર્વીચીભિરારાદખિલમપિ જગત્પ્લાવયન્તં હયં તમ્ ॥ ૨૩॥

પુષ્ણન્ હર્ષં સુરાણાં જનિમયમયતિ સ્મેતિ નો વસ્તુમીશે
પ્રાગેવાસીત્પ્રમત્તાસુરગૃદ્બનિકરે યત્સુરાણાં પ્રહર્ષઃ ।
શ્રુત્યાવિર્ભૂતિહેતુઃ શ્રવણસમુદયાનન્તરેઽસ્મિન્નયુક્તઃ
તસ્માદસ્માદનન્યાન્ ધ્રુવમવિતુમસાવાવિરાસાશ્વભાસા ॥ ૨૪॥

એતશ્શ્વેતોઽપિ રાજદ્રજતગિરિવરાકારધિક્કારકારી
વિદ્યુદ્વિદ્યોતભાસોદ્યદરુણકિરણોન્નિદ્રપદ્મ વહન્ત્યા ।
કાલિન્દીમન્દિરેન્દીવરરુચિરુચિરાપાઙ્ગધારાભિરારાત્
સિઞ્ચન્ત્યાઙ્ગાનિ દેવ્યા સતતકૃતપરિષ્વઙ્ગતોઽવ્યાત્ તુરઙ્ગઃ ॥ ૨૫॥

મઞ્જીરં મઞ્જુલં તે હયમુખ ! મમ સઞ્જીવનાયાસ્તુ શિઞ્જા
વ્યાજેનામ્નાયવાચામનિતરપરતાં વ્યઞ્જયત્ત્વત્પદોર્યત્ ।
લગ્નં તદ્ધારણાસુ દ્વિગુણમુનિજનસ્તોમહૃત્પદ્મનિત્યો-

લ્લાસાયાસાદિતાત્મદ્વયમિવ સવિધે જાગ્રદર્કસ્ય વિમ્બમ્ ॥ ૨૬॥

હારિદ્રં કિન્નુ સૂત્રં શ્રુતિતતિસુદતીકણ્ઠભૂષાર્થક્લૃપ્તં
સ્રોતસ્સારસ્વતં વાઙ્મયજનનગીરેર્નિસ્સૃત વેતિ શક્યમ્ ।
વક્ત્રે વાહસ્ય વામપ્રસૃતિતલલસદ્ધૈમસત્પુસ્તકાન્તઃ
દીવ્યત્સૂત્રં પવિત્રં મમ કલયતુ શં ભાનુમાનોઃ સગોત્રમ્ ॥ ૨૭॥

શ્વભ્રેષ્વભ્રેભિયાતીન્દિતિતનુજનુષો ભ્રામયિત્વા વિભિન્દન્
શીર્ણાઙ્ગાન્ કીર્ણકેશાન્ ભૃશમતિરભસં પાતયન્ નિર્જરાણામ્ ।
સ્વારાજ્યં પ્રાજ્યયન્યો મિહિર ઇવ હિમજ્યાધરાદુજ્જિહાનઃ
ભાભાત્યશ્વાસ્યવામેતરકરવિધૃતશ્ચક્રરાજસ્સ નોવ્યાત્ ॥ ૨૮॥

શિષ્યાણાં ચિત્તભૂમૌ પ્રચુરતરતમઃકણ્ટકાનિ વ્યપોહ્ય
આસિચ્યાત્યર્થં કટાક્ષામૃતરસવિસરૈશ્શાસ્ત્રબીજાનિ વપ્તુમ્ ।
નિર્નિદ્રો જ્ઞાનમુદ્રારુચિરકરતલે દક્ષિણે યોઽક્ષમાલાં
બિભ્રદ્ભાત્યશ્વવક્ત્રઃ સહરતુ નિતરામંહસાં સંહતિં મે ॥ ૨૯॥

રમ્યં સ્યાદ્બિમ્બમિન્દોઃ શરદુદિતરુચેરમ્બરાન્નિર્યદેતત્
કિં વા ડિણ્ડીરખણ્ડં કલશજલનિધેઃ કિં નુ વા પુણ્ડરીકમ્ ।
વાગ્બ્રહ્મોદ્દામલીલાગૃહમિતિ વિબુધૈરૂહ્યમાનો હયાસ્યે
નોપાત્તઃ સવ્યહસ્તે મમ ભવતુ શુભાલમ્બનં કમ્બુરાજઃ ॥ ૩૦॥

સેવ્યા શર્વાદિસર્વત્રિદશપરિષદા શશ્વદાસાશ્વિની શ્રીઃ
અસ્માકં યા સપત્ની લસતિ બત શિરોઽસ્યાધિરૂઢેતિ સેર્ષ્યમ્ ।
જેતું તાં સન્તતોદિત્વરવરમહસા ભાતિ નક્ષત્રમાલા
દેવચ્છન્દે સ્થિતા યં સતતમપિ સમારાધયન્તીવ સોઽવ્યાત્ ॥ ૩૧॥

નન્તુઃ સન્ત્રાસહારી દધદપિ હરિતાં શશ્વદાત્મન્યનૂનાં
યસ્તાં મૂર્ધ્નેવ નિત્યં પ્રકટયતિ હરેઃ પૂરુષસ્યાપિ સત્યમ્ ।
શ્રૌતીં મુખ્યેતરત્વાવગતિમપિ વિશિષ્ટાદ્વિતીયત્વદૃષ્ટિં
સ્પષ્ટીકર્તું જગત્યાં સ્ફુટયતુ સ ઝટિત્યસ્મદિષ્ટં વિશિષ્ટમ્ ॥ ૩૨॥

મસ્તેઽર્વન્ વિસ્તરૈઃ કિં વિહર મમ મનોમન્દુરાયામમન્દં
કલ્પન્તેઽનુપ્લવાસ્તે મમ સતતમિમે હીન્દ્રિયાશ્વા દશાઽપિ ।
કિં ચાત્રાનલ્પકલ્પાવસરવિસરદુચ્ચાવચાકારમૂર્તિ-
સ્ફૂર્તિસ્ફીતોરુકર્મપ્રગુણતૃણગણશ્ચર્વણાય પ્રણીતઃ ॥ ૩૩॥

વસ્તૂરીકર્તુમર્ચાવિધિષુ સમુચિતં નાન્યદસ્યેતિ જાનન્
કસ્તૂરીરઙ્ગનાથઃ સ્તવમિમમુપદ(ધ)માદિમાશ્વસ્ય ધત્તે ।
યસ્તૂનો યોતિરિક્તઃ સકલમપિ ચ તં હૃદ્યયન્નર્થમસ્મિન્
સ્વસ્તૂલીકારધીરાં વિતરતુ પઠતાં વાગધીશઃ સ બુદ્ધિમ્ ॥ ૩૪॥

ઇતિ શ્રીકસ્તૂરીરઙ્ગાર્યકૃતિષુ શ્રીલક્ષ્મીહયવદનમન્ત્રમાલિકાસ્તુતિઃ સમાપ્તા ।

Proofread by Swamini Tattvapriyananda tattvapriya3108 at gmail.com

*Shri Lakshmi Hayavadana Mantramalika Stuti*
pdf was typeset on November 17, 2018

Please send corrections to *sanskrit@cheerful.com*